"ततो विलोकयामास लोकं लोचनशर्म्मदम् ।
शिवशर्म्मा ततः प्राह तुष्टस्तौ विष्णुपार्षदौ ॥
कोऽसौ जनात्सुखसौ लोकः किन्नाम वदताङ्गणौ ॥
गणावूचतुः ।
गान्धर्व्वस्त्वेष लोकोऽमी गन्धर्व्वाश्च शुभव्रताः ।
देवानां गायना ह्येते चारणाः स्तुतिपाटकाः ॥
गीतज्ञा अतिगीतेन तोषयन्ति नराधिपान् ।
स्तुवन्ति च धनाढ्यांश्च धनलोभेन मोहिताः ॥
राज्ञां प्रसादलब्धानि सुवासांसि धनानि च ।
द्रव्याण्यपि सुगन्धीनि कर्पूरादीन्यनेकशः ॥
ब्राह्मणेभ्यः प्रयच्छन्ति गीतं गायन्त्यहर्निशम् ।
स्तुतावेव मनस्तेषां नान्यशास्त्रकृतश्रमाः ॥
तेन पुण्येन गान्धर्व्वो लोकस्त्वेषां विधीयते ।
ब्राह्मणास्तोषिता यैश्च गीतविद्यार्ज्जितैर्धनैः ॥
गीतविद्याप्रभावेण देवर्षिर्नारदो महान् ।
मान्यो वैष्णवलोके वै श्रीशम्भोश्चातिवल्लभः ॥
तुम्बुरुर्नारदश्चोभौ देवानामपि दुर्लभौ ।
नादरूपी शिवः साक्षात् नादतत्त्वविदौ हि तौ ॥
यदि गीतं क्वचिद्गीतं श्रीमद्धरिहरात्मकम् ।
मोक्षन्तु तत्फलं प्राहुः सान्निध्यमथवा तयोः ॥
गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् ।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥
अस्मिंल्लोके सदा कालं स्तुतिरेषा प्रगीयते ।
तद्गीतमालया पूज्यौ देवौ हरिहरौ सदा ॥
इति शृण्वन् क्षणात् प्राप पुनरन्यं मनोहरम् ।
शिवशर्म्माथ पप्रच्छ किंसंज्ञं नगरन्त्विदम् ॥"
इति काशीखण्डम् ॥ * ॥
घोटकः । (यथा, महाभारते । ३ । १६१ । २३ ।
"रथं संयोजयामासुर्गन्धर्व्वैर्हेममालिभिः ॥")
पशुजातिविशेषः । स तु कस्तूरीमृगः । अन्तराभवसत्वः । इत्यमरः । ३ । ३ । १३२ ॥ "अन्तराभवसत्वस्तु जन्ममरणयोर्मध्यभवः प्राणी यो मृतो नैव कायान्तरं प्राप्तः नापि जन्म स मरणजन्मनोरन्तरा भवत्वादन्तराभवसत्वः स च यातनाशरीरः इत्येके इति मुकुटः । शुभप्राणीति केचित् गन्धर्व्वाः पतयो मम इति विराटे इति रमानाथः ।" इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ४ । ८ । ३४ ।
"न चाप्यहं चालयितुं शक्या केनचिदङ्गने ! ।
दुःखशीला हि गन्धर्व्वास्ते च मे बलवत् प्रियाः ।
प्रच्छन्नाश्चापि रक्षन्ति ते मां नित्यं शुचिस्मिते! ॥")
पुंस्कोकिलः । गायनमात्रम् । इति मेदिनी । वे । ११ ॥ (शिवः । यथा, महाभारते ।१३।१७।६७ ।
"गन्धर्व्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुशारदः ॥")
ग्रहविशेषः । यथा, सुश्रुते ।
"देवास्तथा शत्रुगणाश्च तेषां
गन्धर्व्वयक्षाः पितरो भुजङ्गाः ।
रक्षांसि या चापि पिशाचजाति-
रेषोऽष्टधा देवगणो ग्रहाख्यः ॥"
एतैर्ग्रहैर्ग्रस्तस्य मनुष्यस्य लक्षणं यथा तत्रैव ।
"हृष्टात्मा पुलिनवनान्तरोपसेवी
स्वाचारः प्रियपरिगीतगन्धमाल्यः ।
नृत्यन् वा प्रहसति चारुचाल्पशब्दं
गन्धर्व्वग्रहपरिपीड़ितो मनुष्यः ॥"
अस्योदाहरणं श्रुतावपि यथा, बृहदारण्यके ७म ब्राह्मणे जनकगोदानप्रकरणे ।
"मद्रेषु चरकाः पर्य्यव्रजाम ते पतञ्चलस्य काप्यस्य गृहानैम तस्यासीद्दुहिता गन्धर्व्वगृहीता ॥"
"मद्रेषु मद्रानाम जनपदास्तेषु चरकाः अध्ययनार्थं व्रतचरणात् चरका अध्वर्य्यवो वा पर्य्यव्रजाम पर्य्यटितवन्तः । ते वयं पर्य्यटन्तः पतञ्चलस्य नामतः काप्यस्य कपिगोत्रस्य गृहानैम गतवन्तः । तस्यासीद्दुहिता गन्धर्व्वगृहीता । गन्धर्व्वेण अमानुषेण सत्वेन केनचिदाविष्टा ॥" * ॥
गाः रश्मीन् वृषणोपयोगीनि वारीणि वा धारयति इति । गो + धृ + वः गोर्गमादेशश्च भाष्यकृद्भिर्भगवन्माधवाचार्य्यपादैरित्येवं व्युत्पत्तिकृते सोमः । रश्मिमात्रधारकः । उदकधारकसूर्य्याशादित्यविशेषः सूर्य्यश्च एते सर्व्वे एव बोधिता इत्यर्थः । एतेषां क्रमान्वयेनोदाहरणम् । यथा, ऋग्वेदे । १ । १६३ । २ ।
"गन्धर्व्वो अस्य रशना मगृभ्णात् सूरादश्वं वसवो निरतष्ट ॥" "गन्धर्व्वः सोमः ।" इति भाष्यम् । तत्रैव । ६ । ५८६ । १२ । "ऊर्द्ध्वो गन्धर्व्वो अधिनाके अस्थात् विश्वारूपा प्रतिचक्षाणो अस्य ॥" "गन्धर्व्वो रश्मीनां धारकः ।" इति भाष्यम् । तत्रैव वेदे । ६ । ८३ । ४ । "गन्धर्व्व इत्या पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतः ।" "गन्धर्व्वः उदकानां स्तुतीनां वा धारक आदित्यः ।" इति भाष्यम् । तत्रैव । ८।१।११। "वहत् कुत्समार्ज्जुनेयं शतक्रतुः त्सरद्गन्धर्व्वमस्तृतम् ।" "गन्धर्व्वः गवां रश्मीनां धर्त्तारं सूर्य्यम् । इति भाष्यम् ॥" अहः दिवससमूह इत्यर्थः । यथा, भागवते । ४ । २६ । २१ ।
"तस्याहानीह गन्धर्व्वा गन्धर्व्व्यो रात्रयः स्मृताः ।"
राज्ञां स्तुतिपाठकः । यथा, भागवते ।१।११।२० ।
"नटनर्त्तकगन्धर्व्वाः सूतमागधवन्दिनः ।
गायन्ति चोत्तमश्लोकचरितान्यद्भुतानि च ॥"
अनूढ़ानां बालास्त्रीणां भर्त्तृभोगात् प्रागेव प्रथमव्यञ्जद्यौवनोपभोक्तृरूपशरीराधिष्ठातृदेवविशेषः । यथा, ऋग्वेदे । १० । ८५ । ४० ।
"सोमः प्रथमो विविदे गन्धर्व्वो विविद उत्तरः ।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥"
तथाच पञ्चतन्त्रे । ३ । २१०-२१३ ।
"स्त्रियः पूर्व्वं सुरैर्भुक्ताः सोमगन्धर्व्ववह्निभिः ।
भुञ्जते मानुषाः पश्चात् तस्माद्दोषो न विद्यते ॥
सोमस्तासां ददौ शौचं गन्धर्व्वाः शिक्षितं गिरम् ।
पावकः सर्व्वमेध्यत्वं तस्मान्निष्कल्मषाः स्त्रियः ॥
असम्प्राप्तरजा गौरी प्राप्ते रजसि रोहिणी ।
अव्यञ्जना भवेत् कन्या कुचहीना च नग्निका ॥
व्यञ्जनैस्तु समुत्पन्नैः सोमो भुङ्क्ते हि कन्यकाम् ।
पयोधराभ्यां गन्धर्व्वा रजस्यग्निः प्रतिष्ठितः ॥")
गन्धर्व्वतैलं, क्ली, (गन्धर्व्वनामकं तैलम् । शाकपार्थिववत् मध्यपदलोपिकर्म्मधारयः ।) एरण्डतैलम् ।
"गन्धर्व्वतैलसिद्धां हरीतकीं गोऽम्बुना पिबेत् ।
श्लीपदविबन्धमुक्तो भवत्यसौ सप्तरात्रेण ॥
गन्धर्व्वतैलं एरण्डतैलम् । गोऽम्बुना गोमूत्रेण ॥"
इति भावप्रकाशः ॥
गन्धर्व्ववेदः, पुं, (वेत्त्यस्मादनेन वा । विद् + अपादाने करणे वा घञ् वेदः । गन्धर्व्वाणां सङ्गीतविद्योपजीविनां यो वेदः सामवेदस्योपवेदविशेषः । यद्वा गन्धर्व्वः गन्धर्व्वसम्बन्धिनी गन्धर्व्वकलेत्यर्थः सङ्गीतरूपा विद्या विद्यतेऽनेनास्माद् वा । विद् ज्ञाने + करणे अपादने वा घञ् ।) संगीतविद्या । यथा, "ऋग्वेदस्यायुर्व्वेदोपवेदो यजुर्व्वेदस्य धनुर्व्वेदोपवेदः । सामवेदस्य गन्धर्व्ववेदोपवेदोऽथर्व्ववेदस्य शस्त्रशास्त्राणीति ।" इति शौनकोक्तचरणव्यूहः ॥
गन्धर्व्वहस्तः, पुं, (गन्धर्व्वस्य मृगविशेषस्य हस्तः अग्रपाद इव शाखादलञ्चास्य ।) एरण्डवृक्षः । इति हारावली । १०८ ॥ एतस्य पत्राम्लवणोत्पत्तिमाश्रित्य कप् प्रत्ययेन सह यथाह सुश्रुतः ।
"गन्धर्व्वहस्तकमुष्ककनक्तमालाटरूषकपूतिकारग्वधचित्रपदीनां पत्राण्यार्द्राणि लवणेन सहोदूखलेऽनुवद्य स्नेहघटे प्रक्षिप्यावलिप्य गोशकृद्भिर्दाहयेत् एतत् पत्रलवणमुपदिशन्ति वातरोगेषु ॥")
गन्धर्व्वहस्तकः, पुं, (गन्धर्व्वहस्त + स्वार्थे कन् ।) एरण्डवृक्षः । इत्यमरः । २ । ४ । ५० ॥ (यथास्य पर्य्यायाः । वैद्यकरत्नमालायाम् ।
"आमण्डो वर्द्धमानः स्यादेरण्डो रुबुको चकः ।
गन्धर्व्वहस्तकश्चित्रो वातारिस्तरुणो रुबु ॥")
गन्धलोलुपा, स्त्री, (गन्धे गन्धात्मकद्रव्ये लोलुपा लोभनप्रकृतिः ।) मक्षिका । इति शब्दरत्नावली ॥
गन्ध(ब)वणिक्, [ज्] पुं, (गन्धस्य अगरुचन्दनादिगन्धद्रव्यजातस्य वणिक् आजीवः । यद्वा गन्ध गन्धद्रव्यजातं पणायते व्यवहरति गन्धद्रव्यस्य क्रयविक्रयादिना आजीवति इत्यर्थः । पण + इजि कृते पस्य (ब)वत्वे च पृषोदरात् साधुः ।) गान्धिकः । स च वर्णसङ्करजातिविशेषः । गन्धवेणिया इति भाषा । स तु अम्बष्ठात् राजपुत्त्र्यां जातः । तस्य कर्म्म लिखनं गन्धदानञ्च । इति पराशरभाष्यम् ॥
गन्धवती, स्त्री, (गन्धो विद्यतेऽस्याः । गन्ध + मतुप् । मस्य वत्वे स्त्रियां ङीप् ।) पृथिवी । ("गन्धवती पृथ्वीरूपा ।" इति काशीखण्डे । २६ । ४६ श्लोकस्य टीकायाम् ॥) वायुपुरी । (यथा, काशीखण्डे । १३ । १ ।
"इमां गन्धवतीं पुण्यां पुरीं वायोर्विलोकय ।
वारुण्या उत्तरे भागे महाभाग्यनिधे द्विज ! ॥")
व्यासमाता । (इयं हि पूर्व्वं मत्स्यगन्धा आसीत् पश्चात् प्रसन्नात् पराशरात् लब्धवरा सद्गन्धविशिष्टा गन्धवतीति प्रसिद्धा जाता । यथा, महाभारते । १ । ६३ । ७६—८० ।
"एवमुक्ता वरं वव्रे गात्रसौगन्ध्यमुत्तमम् ।